पापयोः प्रायश्चित्तभेदो यथा अङ्गिराः "अकामतः कृते पापे प्रायश्चित्तं, न कामतः। स्यात्त्वकामकृते यत्तु द्विगुणं बुद्धिपूर्वके"। प्रायश्चित्ताकथने दोषो यथा "आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः। जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः। अनर्च्चितैरनाहूतैरपृष्टैश्चैव संसदि। प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः। न्यायतो मार्गमाणस्य क्षत्रियादेः प्रणामिनः। अन्तरा ब्राह्मणं कृत्वा व्रतमेतत् समादिशेत्" हारीतः "यथावयो यथाकालं यथाप्राणञ्च ब्राह्मणे। प्रायश्चित्तं प्रदातव्यं ब्राह्मणैर्धर्मपाठकैः। तस्मात् कृच्छ्रमथार्द्धं पादं वापि (पादमेव नातो न्यूनम्)विधानतः। ज्ञात्वा बलाबलं कालं प्रायश्चित्तं प्रकल्पयेत्। अशक्तावनुग्रहमाह पराशरः। "दुर्बलेऽनुग्रहः कार्य्यस्तथा वै शिशुवृद्धयोः। अतोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रही भवेत्"। स्नेहादिनानुग्रहे दोषो यथा "स्नेहाद्वा यदि वा लोभात् भीहादज्ञानतोऽपि वा। कुर्वन्त्यनुग्रहं ये तु तत् पापं तेषु गच्छति। शास्त्रीयप्रायश्चित्तमुदाहृत्य पश्चादनुग्रहः कार्य्य इत्याहाङ्गिराः "कृत्वा पूर्वमुदाहारं यथोक्तं धर्मवक्तृभिः। पश्चात् कार्य्यानुसारेण शक्त्या कुर्य्यादनुग्रहम्"। वृद्धत्वादिभेदात् प्रायश्चित्तं यथा "अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च"। पापनिष्क्रमणोपायानाह मनुः "ख्यापनेनानुतापेन तपसाऽध्ययनेन च। पापकृन्मुच्यते पापात्तथा दानेन चापदि"। ख्यापदीत्यनेन अध्ययनतपसोर्दानमनुकल्प इत्युक्तम्। एतद्धिंसाव्यतिरिक्तविषयम्। हिंसायान्तु दानं मुख्यम्। यथा भविष्ये "हिंसात्मकानां सर्वेषां कीर्त्तितानां मनीषिभिः। प्रायश्चित्तकदम्बानां दानं प्रथममुच्यते"। तथा मनुः "दानेन बधनिर्णेकं सर्पादीनामशक्नुवन्। एकैकशश्चरेत् कृच्छ्रं द्विजः पापापनुत्तये"। समान्यप्रायश्चित्तान्याह संवर्त्तः "हिरण्यदानं गोदानं भूमिदानं तथैव च। नाशयन्त्याशु पापानि महापातकजान्यपि"। यमः "शोषणेन शरीरस्य तपसाऽध्ययनेन च। पापकृन्मुच्यते पापात् दानेन च दमनेच"। मनुः "कृत्वा पापं हि सन्ताप्य तस्मात् पापात् प्रमुच्यते। नैतत् कुर्य्यां पुनरिति निवृत्त्या पूयते नरः"। विष्णुपुराणम् "प्रायश्चित्तान्यशेषाणि कृष्णानुस्मरणं परम्"। यमः "गवाह्निकं देवपूजा वेदाभ्यासः सरित्प्लवः। नाशयन्त्याशु पापानि महापातकजान्यपि"। गोतमः "हिरण्यं गौर्वासोऽश्वो भूमिस्तिला घृतमन्नमिति देयानि"। एतान्येवानादेशे विकल्पेन क्रियेरन् एनसि लघुनि लघूनि गुरुणि गुरूणि"। विष्णुपुराणम् "एवं विषयभेदाद्वै व्यवस्थाप्यानि पुत्रक!। प्रायश्चित्तानि सर्वाणि गुरूणि च लघूनि च। अन्यथा हि महाबाहो! लघूनामुपदेशतः। गुरूणामुपदेशो हि निष्प्रयोजनतां व्रजेत्"। महाभारते "यद्यकार्य्यशतं कृत्वा कृतं गङ्गाभिषेचनम्। सर्वं दहति गङ्गाम्भस्तूलराशिमिवानलः"। शुद्धिकारणानि व्रतान्याह विश्वामित्रः "कृच्छ्रचान्द्रायणादीनि शुद्ध्यभ्युदयकारणम्। प्रकाशे वा रहस्ये वा संशयेऽनुक्तके स्फुटे। प्राजापत्यं सान्तपनं शिशुकृच्छ्रं पराककः। अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यकृच्छ्रोऽतिकृच्छ्रकः। महासान्तपनः शुद्धौ तप्तकृच्छ्रस्तु पावनः। जलोपवासकृच्छ्रश्च ब्रह्मकूर्चस्तु शोधकः। एते समस्ता व्यस्ता वा प्रत्येकमेकशोऽपि वा। पातकादिषु सर्वेषु पापकेषु प्रयत्नतः। कार्य्याश्चान्द्रायणैर्युक्ताः केवला वा विशुद्धये। शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा। यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति। उपवासस्त्रिरात्रं वा मासं पक्षं तदर्द्धकम्। षडहद्वादशाहादि कार्य्यं शुद्धिफलार्थिना। उपपातकयुक्तानामनादिष्टेषु चैव हि। प्रकाशे च रहस्ये च अभिसन्ध्याद्यपेक्षया। जातिशक्तिगुणान् दृष्ट्वा सकृद्बुद्धिकृतं तथा। अनुबन्धादिकं दृष्ट्वा सर्वं कार्य्यं यथाक्रमम्"। प्रकाशकृते पापे व्रतानि मुख्यानि रहस्यकृते जपादीनि यथा प्राजापत्यादीन्यभिधाय मनुः "एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः। अनाविष्कृतपापांस्तु मन्त्रैर्होमैस्तु शोधयेत्"। देवलः "प्रकाश उक्तं यत्किञ्चित् विंशभागो रहस्यके। त्रिंशभागः षष्टिभागः कल्प्यो जात्याद्यपेक्षया" प्रा॰ वि॰। क्वचिद्विषयभेदे प्रायश्चित्ताभावः यथोक्तं प्रा॰त॰

अथ गोबधाद्यपवादः। पराशरः "यूपेषु वहमानेषु दण्डेनाभिहतस्य च। काष्ठेन लेष्टुना वापि पाषाणेन तु ताड़ितः। मूर्च्छितः पतितश्चैव मृतो वा सद्य एव च। एवं गतानां धूर्य्याणां प्रवक्ष्यामि यथाविधि। उत्थितस्तु पदं गच्छेत् पञ्च सप्त दशाथ वा। ग्रासं वा यदि गृह्णाति तोयं वा पिबति स्वयम्। पूर्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते" यदि व्याधिप्रयुक्तानां इमाणां